सनत्कुमारतंत्र

नं- १६५०

सनत्कुमारीयंतंत्रम्

स॰
कुमा॰
१

ॐश्रीगणेशायनमः ॐनमो गणेशाय। नमःक
मलकिंजल्कपीतनिर्म्मित वाससे। महाभुजरि
पुस्कन्धरूढचक्रा यचक्रिणे। विविक्ते भुवने र
म्ये सिद्धचारणसेविते। सनत् कुमारं नत्वाथ प
प्रच्छेदं पुलस्त्यकः। कृष्णस्य च महाबाहोर्म्माहा

त्म्यं वक्तुमर्हसि। मंत्रराजं यथाम्नायं प्रसादं कु
रु सुव्रत सनत्कुमार उवाच शृणुरूपं प्रव

क्ष्यामि कृष्णस्याभेदकर्म्मिणः । यस्याहं वशगो नि
त्यं रविरुद्राः सवासवाः । किम्वाने महिमा तस्य
वक्तव्यो मुनिसत्तम । दिवि भुव्यंतरीक्षे च विष्णु
रित्यभिधीयते । विधानं तस्य वक्ष्यामि यथा तत्वं
निशामय । आदौ गुरुमुखाल्लब्ध्वा मंत्रं भक्तिसम
न्वितः । गुरवे दक्षिणान्दत्वा पूर्वं सेवां समाचरे
त् । आदौ नैमित्तिकं कृत्वा सूर्य्यं संपूज्य भक्तितः
देवार्च्चनं तथा कृत्वा ग्रासं दद्याद्दयान्वितः । द्वि
जं संतर्पणं कृत्वा प्रकृष्टेनांतरात्मना । गिरौ न
द्यां वने तीर्थे गोष्ठे देवालये तथा । अश्वत्थे सा
गरांते वाजपेत् प्रतिसहस्रकं शतं चैवाष्टकं
कृत्वाभुक्त्वा स्यानेष्टबुद्धिमान् । षोडशेनोपचा
रेण संपूज्य मधुसूदनं कालेध्यात्वा यथा न्या
यं नैवेद्यं च निविदयेत् । वैष्णवे हृदयाह्वाने
मंत्रराजं निशामय । समाहितः शुचिर्भूत्वा भ
क्तिमानुद्धरेद्बुधः । ओंकारं पूर्वमुद्धृत्य त्रिवारं
परमेश्वरं । यत्रकामो भवेन्मंत्री मंत्रस्यादौ नि
वेशयेत् । पद्मजं तन्मुखोपेतं शाक्रस्योपरि सं
स्थितं । सेन्दुबिन्दुशिखोपेतं प्रथमं सर्वकामदं ।
तिथिं वह्नि समारूढं श्रिया मूर्ध्नि व्यवस्थितं ।

शशिविन्दुशिखाव्याप्तं द्वितीयं श्रीप्रदायकं । वर्णं
पञ्चसमायुक्तं पावकोपरि संस्थितं । सेन्दुविन्दु
शिखाक्रांतं तृतीयं मोक्षदं मतं । खांतं नांतं तथा
छांतं थांतं लांतं चलद्वयं । वांतं रांतं तथा सांतं लां
तं सांतांतकं तथा । पपरं येपरं चैव अपरांतं प
रत्रयं । आद्यं गोपीजनपदं वल्लभाय ततः परं ।
ठद्वयं च ततो दद्यात्संपूर्णं सिद्धिदायकं । इति स
नत्कुमारीये प्रथमः पटलः १ अथ सम्यक् प्रव
क्ष्यामि यजनं ध्यानमेव च । ध्याने चैव हि काल
स्य नैवेद्यं च निशामय । ब्राह्मे मुहूर्त्ते उत्थाय शु
चिर्भूत्वा समाहितः । आसने उपविश्याथ गुरुं
नत्वा कृतांजलिः । आत्मानं ब्रह्मणो रूपं चिंतये
च मुहुर्मुहुः । जप्त्वा मंत्रं च सर्वेषां वादिनां वि
जयी भवेत् । ततः स्नात्वा शुचिर्भूत्वा सन्ध्यादी
न् वैदिकांस्तथा । कुर्याद्गुरूपदेशेन लौकिका
नपि देशिकः । श्रीकृष्णं तर्पयामीति मूलमुच्चा
र्य तर्पयेत् । पूजालये चोपविश्य पादप्रक्षाल
नं सुधीः । शिखाया बन्धनं चैव चास्त्रमंत्रेण मंत्र
वित् । आचम्य द्वारदेवांस्तु पूजयेत्साधकोत्तमः ।
विघ्नानुत्सादयित्वा तु हृत्पद्मं विशोधयेत् ।

गुरुं नत्वा गणेशं च वास्तुपूजां समाचरेत् । ब्र
ह्माणं पूजयित्वा तु आत्मासनमतः परं । भूतशु
द्धिं विधायाथ देवोऽहं चिंतयेद्बुधः । ऋष्यादिन्या
सं संहीश्च मातृकार्णं ततो न्यसेत् । प्राणायाम
त्रयं कृत्वा मूलेन प्रणवेन वा । आदस्तपादके
शांते व्यापकन्यासमाचरेत् । त्रैलोक्यरक्षणं च
क्र मस्तकांतकमेव च । एकैकं पूर्वतः कृत्वा हा
दशांचक्रमेव च । चतुर्थ्यंतेन संन्यस्य स्वाहांतेन
समापयेत् । तथा चांगं समुद्धार्थ्य प्रत्येकैकं नि
योजयेत् । नमः स्वाहा स्वधा वौषट् वषट्कार
स्तु मस्तके । हृदि पूज्य शिखादेशांततो दिक्षु
यथाक्रमं । सशक्तिभिः केशवाद्यै न्यासं कुर्या
द्विचक्षणः । विभूतिपंजरं न्यस्य न्यसेत्तन्मूर्तिपं
जरं । तत्त्वन्यासं प्रकुर्वीत करन्यासं तथा बुधः ।
मंत्रन्यासं प्रकुर्वीत व्यापकं च विधान्यसेत् । वि
भूतिपंजरन्यासं यत्र यत्र दशाक्षरं । एवं कल्पो
क्तन्यासानुक्रमेण परिकल्पयेत् । शंख
स्थापनकं चापि कुर्याद् गुरूपदेशतः । अर्घ्यं चा
पि तथा कृत्वा द्रव्यमभ्युक्षयेत्ततः । पीठं प्रक
ल्पदेहे स्वधर्मादीन् पूजयेद्वयतः । हृदि चैव

अनंतादीन् पूजयेत्तु यथाविधि। वाह्यं सुवर्णर
हस्यस्य वर्णिनोऽन्तः प्रपूजनं। यंत्रं निर्माय ना
म्ने तु अनंतादीन् प्रपूजयेत्। तस्य कोणेषु ध
र्म्मादीन् तत्पार्श्वे पूर्वधर्म्मकान्। मध्येपि पूज
येन्नित्य मानंदादि चतुर्दश। केशरेषु च पूजा वै
विमलाद्येषु देवताः। आत्मानं देवताभाव्य स्व
नासापुटके न तु। निर्माय पूजयेद्देवं सदावाह्य
प्रयत्नतः। अनंताद्येषु वीजेषु प्राणस्थानं स
माचरेत्। पाद्यादींश्चैव यत्नेन पूजयेदाहृतिग
णान्। धूपदीपौ समासाद्य नैवेद्यंच निवेदयेत्।
जप्त्वा मंत्रंच तंत्रोक्तं पूजयेद्देववत् स्वयं। श्रीकृ
ष्णं तर्पयामीति मूलमुच्चार्य यत्नतः। वारत्रिर
र्घतोयेन तर्पयेन्मंत्रमस्तके। प्राणायामं त्रयं
कृत्वा व्यापकंच त्रयं न्यसेत्। स्वतंत्रोक्तेन विधि
ना प्रयोगं कुरुते सुधीः। इति सनत्कुमारीयतंत्रे
पूजासूत्रं नाम द्वितीयः पटलः २ अथ विस्ता
र्यं वक्ष्यामि साधकानां हिताय च। हंसमंत्रेण जी
वं वै सतत्वं कुण्डलीयुतं। योगयुक्तेन विधिना
परं ब्रह्मणि योजयेत्। वामनासापुटे धूम्रं वायु
वीजं विचिंतयेत्। तेन संशोधयेद्देहं दहयातं

विचिंतयेत्। दक्षनासापुटे रंध्रे वह्निबीजं वि
चिंतयेत्। तेन संजनितो वह्निः शुष्कं देहं च भ
स्मसात्। कृत्वा तेवामया रेच्य ठं बीजं शुक्लवर्ण
कं। ललाटे योज्य चन्द्रस्थममृतं तेन पातयेत्।
तेन संजनितं देहं पवित्रं सुमनोहरं। भावयि
त्वा विधानेन जीवं स्वस्थानमानयेत्। सोहं मंत्रे
ण कुण्डल्या तत्वैश्च परिवारितः। भूतशुद्धिरिति
प्रोक्ता सर्वदा तत्प्रदायिनी। प्राणायाममथो
वक्ष्ये यथावदवधारय। दक्षया रेचयेद्वायुं द्वा
त्रिंशन्मात्रमानतः। ईड्याकर्षये द्वायुं मनोः
षोड़शमात्रया। सुषुम्नामध्यगं कृत्वा विद्यासंख्ये
न धारयेत्। येनैव पूरयेद्वायुं तेनैव रेचयेत्
पुनः ये नैव रेचयेत् पूर्वं तेनैव पूरयेत् पुनः।
उभयोर्मध्यगं कृत्वा तत्तन्मात्राभिधारणं। ततः
पूर्वोक्तरूपं तत्त प्राणायामं व्यवस्थितं। मातृ
कान्यासकं वक्ष्ये यथावदवधारय। ललाटे च
मुखे चैव चक्षुषोः कर्णयोस्तथा। नासायां गण्ड
योश्चैव ओष्ठयोर्दन्तयोस्तथा। मस्तके च मुखे
चैव स्कंधश्च क्रमतो न्यसेत्। हस्तयोः पादयोश्चै
व संधिष्वग्रे यथाविधि। पार्श्वयोः पृष्ठतश्चैव

नाभौ च उदरे तथा। ककारादीन्मकारांतान् वर्णा
न्त्वगतान् न्यसेत्। हृदये स्कन्धदेशे च अंप्रायोश्च
निरामयः। यादयश्चैव चत्वारो न्यसनीयाः प्रयत्न
तः। शादयश्चैव षट्चैव हृदयादिषु निर्दिशेत्।
हस्तपादाग्रयो नाभौ वक्त्रे चैव विनिश्चयः। मातृका
न्यासमेतद्धि प्रोक्तं सर्वं समृद्धिदं। पीठन्यासमथो
वक्ष्ये यथावदवधारय। कल्पये दात्मनोदेहे पी
ठं धर्मादितः क्रमात्। अपणायुगयोर्विद्वान् प्रा
दक्षिण्येन देशिकः। धर्मं ज्ञानं च वैराग्यमैश्वर्यं
न्यसेत्त क्रमात्। मुखे पार्श्वे नाभिपार्श्वे धर्मादी
स्तु प्रकल्पयेत्। धर्मादयः स्मृताः पादाः पीठ
गात्राणि चापरे। अनंतं हृदये पद्ममस्मिन् सूर्ये
न्दुपावकान्। पश्चात्स्वस्वकला न्यस्याः प्रणवाद्य
रपूर्विकाः। सत्त्वादीं स्त्रीगुणान् न्यस्य तत्रैवात्र
गुरूत्तमः। आत्मानमंतरात्मानं परमात्मानमे
व च। ज्ञानात्मानं न्यसेद्धीमान् मायाबीज पुरःस
रं। इच्छाज्ञानाक्रिया चैव कामिनी कामदायिनी।
रती रतिप्रिया चैव मध्ये चैव मनोन्मनी। सोहंस
दा शिवप्रेतं डेन्तं देव्या समाश्रयेत्। पीठन्यासं
विधायेत्थं चिन्तयेदिष्टदेवतां। इति सनत्कुमा

रीये पीठयजनंनाम तृतीयःपटलः ३ ध्यात्वावे
णुकरं देवं नवीनजलदप्रभम्। नवनीतंदक्षह
स्ते दधानं पीतवाससं। आवाह्य पूजयेद्यंत्रे शं
खस्थापन पूर्व्वकं। शंखं मंत्राम्बुभिः प्रोक्ष्य वामतो
वह्निमण्डले। साधारं स्थापयेद्विद्वान् विन्दुस्तनस
यामयैः। तोयैः स्रगादिपुष्पाद्यैः पूजयेत्तं यथा
विधि आधारं पावकं शंखं सूर्य्यं तोयं सुधाकरं।
स्मरेद्वह्न्यर्कचन्द्राणां कलास्तास्वेषु क्रमात्।
मूलमंत्रंजपेत् स्पष्टान्यसेत्तस्यांगमंत्रवित्। स्वमं
त्रेणाभिसंपूज्य हस्ताभ्यां छादयेत् पुनः। जपे
न्मंत्रं यथाकाले देशिको देवताधिया। अस्त्रमंत्रे
ण संरक्ष्य कवचेनावगुंठ्य च। धेनुमुद्रां समासाद्य
बोधयेत्तं स्वमुद्रया। गंगे च यमुने चैव गोदावरि
सरस्वति। नर्म्मदे सिन्धुकावेरि जलेऽस्मिन् सन्नि
धिं कुरु। तीर्थावाहनमंत्रोऽयं प्रोक्तः सर्व्वसमृद्धि
दः। दक्षिणे प्रोक्षणीपात्रमादायाद्भिः प्रपूरितं।
किंचिदर्घ्याम्बु संगृह्य प्रोक्षण्यम्भसि योजयेत्।
अर्घ्यस्योत्तरतः कार्य्यं पाद्याचमनीयकं। आत्मा
नं यागवस्तूनि पीठाणि प्रोक्षयेद्गुरुः। शंखस्था
पनकं सम्यक् प्रोक्तं सर्व्वसमृद्धिदं। शिवादय

श्च संपूज्याः केशवेष्वंगदेवताः। आवाह्य प्राणम
न्त्रेण प्राणस्थापनमाचरेत्। पाशादित्र्यक्षरान् सो
न्ते हंसोऽमुष्य पदं पुनः। क्रमात् प्राणा इह प्राणा
अथो जीव इह स्थितः। अमुष्य सर्वेन्द्रियाणि भूयोऽ
मुष्यपदं वदेत्। वांमनो नयन श्रोत्र घ्राण प्राणाः
पदान्यथ। पश्चादिहागत्य सुखं चिरं तिष्ठन्तु ठद्वयं।
अयं प्राणमन्त्रः प्रोक्तः सर्वेषां प्राणधारकः। स्वा
गतं कुशलप्रश्नं निगदेद्यतो गुरुः। पाद्यं पादा
म्बुजे दद्याद्देवस्य हृदयात्मना पतच्छ्यामाकदू
र्वाब्जविष्णुक्रान्ताभिरीरितम्। स्वधा मन्त्रेण वद
ने दद्यादाचमनीयकं। जातीलवंगकक्कोलै लदु
क्तं तत्त्ववेदिभिः। अर्घ्यं दिशेत्ततो मूर्द्धिन शिरोम
न्त्रेण देशिकः। गन्धपुष्पाक्षतयव कुशाग्रतिलस
र्षपैः। दूर्वाभिः सर्वदेवाना मेतदर्घ्यमुदीरितं। स्व
धात्मना ततः कुर्यान्मधुपर्कं समाहितः। आज्यंद
धिमधुन्मिश्रमेतदुक्तं मनीषिभिः। स्वधात्मनाततः
कुर्यादद्भिराचमनीयकं। गन्धाभिः कारयेत्
स्नानं वाससी परिधापयेत्। दद्याद्यज्ञोपवीतं
च हाराद्याभरणैः सह। अर्घ्याणामुक्तदेवेषां ग
न्धाद्यैः पूजयेत्तदा। गन्धचन्दनकर्पूरकालागुरु

भिरीरितं। षोडशैरुपचारैश्च पूजयित्वा प्रयत्नतः।
आवृत्तिं पूजयेद्भक्त्या यथावदवधारय। वासुदेवं
देवकीनन्दनं नन्दप्रियं तथा। कमलां भारतींचैव
रतिशक्तिंच पूर्ववतः। शंखं चक्रं गदांचैवपद्म कौ
स्तुभ मेवच। श्रीवत्सं वत्सकंचैव वनमालां
समर्च्चयेत्। मूलेनैव खगाध्यक्षं पूजयेत्तदनंत
रं। स्वबीजेन ततोदेवं गन्धपुष्पादिभिः क्रमात्।
यथासंख्यं ततोमंत्रं पद्माख्येन जपेदथ। समर्च्च
यत्ततोदेवं हृदयादीननंतरं आत्मदेहमयं कृत्वा
प्राणायामं समाचरेत्। अथ देवस्य निर्माल्यैर्वि
ष्वक्सेनं समर्च्चयेत्। एवंक्रमेण कर्त्तव्या कृष्ण
पूजा समाप्यच। पश्चाद्गोभ्यः समभ्यर्च्च्य ग्रासं
कुर्यात् सुशोभनं। केयूरांगदहारैश्च कुण्डलैः क
टिसूत्रकैः। नूपुरैर्द्दिव्यपुष्पैश्च नानारत्नैर्विभूषितं।
सचन्द्रग्रहनक्षत्रे निर्मले गगने वरं। अथ रत्न
प्रभायुक्तं सर्व्वालंकारभूषितं। सनकाद्यैः स्तूयमा
नं विमानस्थैर्नभोगतैः। सर्व्वलक्षणसंयुक्तं प्रातः
कृष्णं समर्च्चयेत्। तथा कल्पप्रभायुक्ते वन्ये कांच
नमण्डपे। रत्नपीठे समासीनं कामिनीशतमध्य
गं। चामराद्यैर्वीज्यमानं चन्दनागुरुचर्च्चितं। ध्या

स·
कु·मा·
८

येत्मध्यस्थितं कृष्णं सुन्दरं सर्वदर्शनं। गोपालगण
मध्यस्थं सुन्दरीशतमध्यगं। ततस्सर्वं स्ववशं कृत्वा
क्रीडयन्तं मुदान्वितं। गन्धचन्दनमाल्याद्यैर्भूषितं
नयोनोत्सवे। यथामध्ये तथा रात्रौ चिन्तयेत्कं
जलोचनं। कांचने राजते पात्रे ताम्रके वाप्यभाव
तः। भक्त्या कृष्णं समभ्यर्च्य नैवेद्यंच निवेदयेत्।
शान्तदध्योदनं दद्यात् पायसंच तथोत्तरं। तथा
सशर्करं क्षीरं रात्रौ दद्यात् सुशोभनं। एभिरेवावि
धानैश्च संसेव्यः परमेश्वरः धर्मार्थकाममोक्षं
हि स लभेत् नात्र संशयः। इति सनत्कुमारीये च
तुर्थः पटलः ४।

अथ मंत्रान्तरं
वक्ष्ये यथाव
दवधारय।
मंत्रं तेऽहं प्र
वक्ष्यामि त्रिषु
लोकेषु दुर्ल्ल
भं। यस्य ग्र
हणमात्रेण
सर्वज्ञो जायते नरः। अचलां भजते लक्ष्मीं कवि

6

त्वं लभते ध्रुवं। असाध्यं लभते मंत्री देवानामपि
दुर्लभं। इयं मे हृदये गुह्यं यत् प्रष्टव्यं महामुने।
अन्ये प्रसाधिता मंत्राः सर्वे च फलदायकाः। गृही
तस्य फलदाता मंत्रोयद्यप्यसाधितः। संतुष्टो हि
गुरुर्यत्र तस्य तुष्टो जगत्पतिः। मंत्रे न्यस्य गुरो
र्वाक्यं न कदाचिद्विकल्पयेत्। गुरोर्देहं समाश्रि
त्य मंत्रदेहोऽवतिष्ठति। ततः सर्वेण भावेन गुरुं
मंत्रेण पूजयेत्। गन्धमाल्यैर्धूपदीपैः संपूज्य
गुरुमेव ततः। ततो मंत्रं च गृहीयाद्धस्तेणाच्छाद्य म
स्तकं। दक्षिणां गुरवे दद्यात् सुवर्णं धेनुमेव च।
सर्वकर्म प्रकुर्वीत वित्तशाठ्यविवर्जितः। अदक्षि
णे कृते कर्म वृथा विधेन्द्र निश्चितं। नारदाय
पुरा प्रोक्तं स्वयं विस्वरजनद्विजः। स्वर्णं मे दक्षिणां
देहि मातृस्तवकमण्डलुः। ततो मंत्रं गृहाण त्वं
यथाविधि महामुने। विधिहीने कृते कर्म सिद्धिं
नैव प्रयच्छति। भूमिभागे समे शुद्धे गोमयेनोप
लेपिते। तत्र पीठं प्रतिष्ठाप्य मातृकावर्णं न्य
सेत्। परं वह्निहितं कृत्वा मंत्रं हंसं समुद्धरेत्।
सांतं पुगांतमां वह्नि रमे मरबिन्दु संयुतं त्रिभि
रेकान्तरीभूतं स्वाहांतं मंत्रमुद्धरेत्। ततो गुरु

सुवोलव्याहृदये च निवेशयेत्। अयुतं च जपं कृ
त्वा हविष्याशी जितेन्द्रियः। दशांशं जुहुयाद्धोम
पुरत्रयसंयुतं। भोजयेद्ब्राह्मणानां च वैष्णवानां
सुसंयतः। शालिकासाधनार्थं च सहस्रमधिकं
जपेत्। दशांशं जुहुयात्तस्य जप्यस्य द्विगुणः स्म
तः। तस्य तत्त्वं निबोध त्वं वाच्यमानं महामुने। श
म्भोर्मूलाद्दूरं ह्यस्य त्रिशाखिस्थ पदेस्थितः। स्म
रेन्मंत्रं ततो ब्रह्मा चेन्दुबिन्दुसमप्रभं। एतत्ते कथि
तं वत्स हृदयं मंत्रमुत्तमं। कस्यचिन्न हि वक्तव्यं
त्रिषु लोकेषु दुर्लभं। एवं च साधिते मंत्रे साधि
तं भुवनत्रयं। कामं कृत्वा जपेन्मंत्रं शुचिर्भूत्वा जि
तेन्द्रियः। कर्मणा मनसा वाचा कुर्याद्यदभिवां
छितं। तस्य सिद्ध्यति क्षिप्रं तद्यद्यपि स्यात् सुदुष्क
रं। विष्णुर्ब्रह्मा च रुद्रश्च दुर्गा च सर्वदेवता। अयं
मंत्रो महामंत्रः सर्वेषां हृदयस्थितः। मंत्रमेतं स
मुच्चार्य लभते द्विगुणं फलं। पूजनं चास्य मंत्रस्य
यथाकार्यं तथा शृणु। अंगन्यासकरन्यासौ मंत्र
स्याक्षरेण तु। कृत्वा चाष्टदलं पद्मं देवमावाह
यत्ततः। स्थण्डिले वा जले वापि गोपालं पूजयेत्त
दा। ध्यानं चैव प्रवक्ष्यामि गोपालस्य जगद्गुरोः।

जटिलं द्विभुजं नग्नं नीलोत्पलदलप्रभं। बालं ष
ण्मासदेशीयं देवं जानुचलं हरिं। दाम्ना चैवोदरे
बद्धं बद्धोडूखलकेन च। लीलयाकर्षमाणं च नी
र्थंकू कृतमुडूखलं जमलार्ज्जुनयोर्म्मध्ये कृतमा
गत्य लीलया। यंत्रेणानेन चोत्पाद्य हस्तौ द्वौ यो
जनायतौ। दाम्नि वासुकिमारोप्य यंत्रेणानेन यं
त्रिते। उडूखले कृते लग्नं नागराजेन वेष्टिते। समा
कृष्य समुत्पाट्य हसंते जमलार्ज्जुनौ। हाहाका
रपरैः सर्व्वैर्गोपगोपीजनैर्वृते। यशोदयाकृते क्रो
डे कृत्वा स्यागत्य सत्वरं। सर्व्वतो जगतो रूपं गोपवे
षात्तिरोहिते। एवं संचिंत्य गोपालं माययालल्लका
मयं। पद्यादिभिः समभ्यर्च्य जपकर्म्म समर्पयेत्।
एभिरेवाष्टपूजा वा कर्त्तव्या सर्ववैरिणः। धूपं दीपं
च नैवेद्यं ताम्बूलादिकमर्पयेत्। इति सनत्कुमारी
ये पंचमः पटलः ५ कृष्णाय पदमाभाष्य गोवि
न्दायततः परं। गोपीजनपदस्यांते वल्लभाय द्वि
ठावधिः। कामबीजादिराख्यातो मनुरष्टादशा
क्षरः। अष्टादशार्णस्य दशार्ण उक्तो मंत्रो यथावि
धि। शक्तिश्रीपूर्व्वकोऽष्टादशार्णो विंशतिवर्णकः।
स्मरः कृष्णाय ठद्वन्द्वं षड्वर्णो मनुरीरितः। प्रण

वेलद्वयं कृष्णं ङे.न्तमुक्का ततः परं तादृशं देवकी
पुत्रं हुंफट्स्वाहा समन्वितं । षोडशाक्षरमंत्रोऽयं
गोविन्दस्य समीरितः । श्रीमन्मुकुन्दचरणं सदेति
शरणं ततः । अहंप्रपन्न इत्युक्तो मौकुन्दोऽष्टादशा
क्षरः । पंचांतको यरा संस्थो मनुर्बिन्दुविभूषितः ।
पिण्डवीजमिदं प्रोक्तं सर्वसिद्धिप्रदायकं । पिण्डं र
तिपतेर्वीजं नमो भगवते ततः । नन्दपुत्राय बा
लादिवपुषे श्यामलायच । गोपीजनपदस्यान्ते
वल्लभाय द्विठावधिः । अनुष्टुप् मंत्रमाख्यातो गो
पालस्य जगत्पतेः । गोपालायाग्निजायान्तः षडक्ष
रः उदाहृतः । कृष्णगोविन्दकौ ङेन्तौ सप्तवर्णो मनु
र्मतः । श्रीशक्तिमाराः कृष्णायमारः सप्ताक्षरः प
रः । क्लीं ग्लौं श्रीं श्यामलांगायनतिः स्याद्दशाव
र्णकः । चक्री वामनसर्गौ च मनुरेकाक्षरः स्मृतः ।
कामामिन्दुश्च मायाच लवलांछितमस्तकः । एक
वर्णो मनुः प्रोक्तः काममंत्रपुरोदितः । एतत्सर्वं
हृषीकेशं चतुर्थ्यंतं नमः पदं । अष्टवर्णो मनुः
प्रोक्तः सर्वेषां हृदयस्थितः । वाग्भवं कामबीजं
च कृष्णाय स्मरसुन्दरी । गोविन्दं ङे. युतं चैव रमा
वीजमनंतरं । दशाक्षरं ततः पश्चात् स्वबीजं त

दनंतरं। द्वाविंशात्यक्षरो मंत्रः सर्वसिद्धि प्रदायकः
कामं मायांच लक्ष्मीं च दशार्णं च ततः परं। त्रयो
दशार्णमंत्रोयं प्रोक्तः सर्वसमृद्धिदः। कामं लक्ष्मी
च मायांच जयकृष्णपदद्वयं। मायालक्ष्मी तथा
कामं जयं देहि पदद्वयं। चतुर्विंशात्यक्षरात्मा स्वा
हांतो मनुरीरितः। कामं पिण्डं तथालक्ष्मी गोपा
लाय ततः परं। लक्ष्मीपिण्डं तथा कामं गोविन्दाय
पदं तथा। कामपिण्डं तथालक्ष्मीं स्वाहांतः प्रणवा
दिकः। इति सनत्कुमारीये षष्ठः पटलः ६ क्रमात्
पूजाविधिं वक्ष्ये यथावदवधारय। नारदोऽस्य ऋषिः
प्रोक्ता गायत्रीछन्द उच्यते। देवताकथितः कृष्णः
सर्वकामफलप्रदः। चतुष्करणवेदाक्षिनेत्रवर्म्मा
स्त्रैः क्रमात्। पंचांगानि मनोः कुर्य्यान्मंत्रवित्त
त्ववर्ज्जितं। प्रत्येषामपि मंत्राणां ऋष्याद्याः पूर्व
देवताः। अंगानि कामबीजेन सनेत्रैर्दीर्घयुक्तकैः
दशाक्षरे विराट्छन्द आचक्रायैश्च पंचकं। पूर्व
प्रोक्तानि कर्म्माणि न्यासादीनि विधानतः। कुर्य्या
च्छुद्धमतिर्द्धीमान् ध्यानमेवं जगत्पतेः। स्मरे
द्वृन्दावने रम्ये मोहयंतमनारतं। गोविन्दं पुण्ड
रीकाक्षं गोपकन्याः सहस्रशः। आत्मनो वदना

स·
कृ·मा·
९

म्भोज प्रेरितात्तिमधुव्रताः । पीडिताः कामवाणेन वि
रमा श्लेषणेन सुकाः । मुक्ताहारलसत्पीनतुंगस्त
नभरानताः । स्रस्तधम्मिल्लवसना मदस्खलितभा
षणाः । दंतपंक्तिप्रभोद्भासिस्पन्दमालाधरोचिताः ।
विलोकयंती विविधैर्विभ्रमैर्भावगर्वितैः । फुल्ले
न्दीवरकांतिमिन्दुवदनं वर्हावतंसप्रियं । श्रीवत्स
लांकमुदारकौस्तुभधरं पीताम्बरं सुन्दरं । गोपीनां
नयनोत्पलार्चिततनुं गोगोपसंघावृतं । गोविन्दंक
लवेणुवादनपरं दिव्यांगभूषं भजे । एवं ध्यात्वाज
पेल्लक्षं पंचचाष्टादशाक्षरं । अन्येषां लक्षमानं च द
शलक्षं दशार्णके । पूर्वसेवां पुरा कुर्यात् पूर्वो
क्तविधिनासतः । वालगोपालमंत्राणां ध्याने स्तु
ए यथाविधि । नवीननीरदश्यामं पक्वविम्वाधरं
विभुं । नवनीतं पायसं च धारयंतं करद्वये । होम
श्चैव तथाकार्य्या जपस्यैव दशांशतः । सर्पिषा न
वनीतेन दध्नावापायसेन वा । हुत्वा मालतिभिः पु
ष्पैः शुक्लपद्मेन चैव हि । तर्पणं तद्दशांशेन सुशु
द्धेन जलेनवा । गंधपुष्पाक्षतैर्युक्तमभिषेकं च म
स्तके । ब्राह्मणान् भोजयेच्चैव दशांशक्रमयोगतः ।
यद्यदंगं भवेद्भंगं तत्संख्याद्विगुणोजपेः । हो

माशक्तो जपः प्रोक्तो होमसंख्या चतुर्गुणः । वि
प्राणां क्षत्रियाणां च रससंख्यागुणंस्मृतं । वैश्या
नां वसुसंख्याकमेषांस्त्रीणामयं विधिः । यं व
र्णमाश्रितः शूद्रः स च तस्य विधिं चरेत् । वैश्या
श्रितस्य शूद्रस्य दशसंख्यागुणंस्मृतं । होमोक्तो
यं विधिः प्रोक्तस्तर्पणोपि निबोध ते । तर्पणो द्वि
गुणं प्रोक्तमशक्तो सर्वसाधने । इति सनत्कुमा
रीये जपहोमादिनिर्णयः सप्तमः पटलः ७
अथ प्रयोगान् वक्ष्यामि यथावद् वयारय । ल
क्ष्मीप्रसूनैर्जुहुयात् श्रियमिच्छन्ननिन्दितां ।
सान्नाज्येन जुहुयादाज्यात्तस्य समृद्धये । आर
ण्यैः कुसुमैर्विप्रान् जातिभिः पृथिवीपतीन् ।
चम्पकैश्च सितोपेतैर्वैश्यांश्च कमलैः शुभैः ।
शूद्रांश्च वशयेन्मंत्री त्रिमध्वक्तैर्यथाक्रमात् ।
एवं कृत्वा द्विजश्रेष्ठः सर्वान् कामानवाप्नुया
त् । ततो भक्त्या श्यामलांगप्रसन्नं गोकुलाश्रयं
शिशुवेषधरं देवं किंकिनीदाममण्डितं । स्म
त्वा तं तर्पयेन्मंत्रीडरूपबुद्ध्या शुभैर्जलैः । धन
धान्यांशुकादीनि प्रीतस्तस्मै ददाति सः । माल
तीकुसुमैर्देवमर्चयित्वा यथाविधि । आयुरा

रोग्यमैश्वर्य्यं मनोभीष्टानि विन्दति। काशप्रसूनै
र्जुहुयादष्टोत्तरसहस्रकं। नाममात्रेण वशगा
स्तस्य स्युःसकलान्नृपाः। हुत्वा बिल्वफलैःपक्वैः।
श्रियमाप्नोत्यनिन्दितां। प्रफुल्लैररुणाम्भोजैस्ता
मेव लभते पुनः। हुत्वा ज्योतिष्मतीतैलं सह
स्रं बहुसंख्यया। सुभगोजायते सम्यक् सर्वेषां
नात्र संशयः। विधानेनामुना मंत्री महारोगात्
प्रमुच्यते। अश्वत्थसमिधैर्होमो यनेष्टूतोधनाव
हः। आज्याक्तदूर्वाहोमेन मुच्यते महतोभयात्।
यस्य नामयुतं पुण्यं जपेदष्ट च संख्यया। सभवे
द्य सवन्नस्य नात्रकार्य्या विचारणा। बहुनात्रकि
मुक्तेन ननुना साधकोत्तमः। साधयेदखिलान्
कामान् साक्षाद्विष्णुरिवापरः। अपुत्रो द्वादशी
प्राप्य पूजयित्वा जगद्गुरुं। देवकीसुतगोविन्द
वासुदेव जगत्पते। देहि मे तनयं देव त्वामहं श
रणंगतः। इति स्तुत्वा विधानेन पूजयेदा वृतीग
णान्। आदावंगावृतीःपूज्यादामादि तदनंतरं।
दिक्षुदामसुदामौ च वसुदामश्च किंकिनी। रुक्मि
ण्याद्यष्टमहिषीर्दलेषु पूजयेत्ततः। दक्षिणकराष्ट
तकमलारसपूरितमुद्रिकान्यकराः। रुक्मिण्या

न्धा तथा सत्या नाग्नजित्या सुनन्दा च । मित्रविन्दा
सुलक्षणा ऋक्षजा सुशीला तथा । ततो यजेद्बलाग्रे
षु वसुदेवं च देवकीं । नन्दगोपं यशोदां च वलभ
द्रं सुभद्रिकां । गोपा गोप्यश्च संपूज्याश्चित्रमाल्यानु
लेपनाः । यथाविधि इमाः पूज्या ब्राह्म्याद्यास्तदनं
तरं । इन्द्राद्याः पूजनीयाश्च वज्राद्यास्तदनंतरं । ब्रा
ह्मी माहेश्वरी चैव कौमारी वैष्णवीति च । वाराही
च तथैन्द्राणी चामुण्डा सप्तमी तथा । अष्टमी स्या
न्महालक्ष्मीः प्रोक्तास्त्वष्ट मातरः । इन्द्रादीन् पूज
येद्धाहो जातिहेतिसशक्तिकान् । वज्रं शक्तिं च द
ण्डं च खड्गं पाशं तथांकुशं । गदां शूलं च चक्रं च
पद्मं तत्रैव पूजयेत् । नैवेद्यं विधिवद्दत्वा देवं ध्यात्वा
जपेत् सुधीः । स्तुत्वा प्रणम्य शिरसा जलेनात्मानम
र्पयेत् । इतःपूर्वं पदं दत्वा प्राण बुद्धिपदं ततः । देह
धर्माधिकारतो जाग्रत्स्वप्नपदान्यतः । सुषुप्त्याव
स्थासु मनसा वाचा कर्मणा तथा । हस्ताभ्यां च
तथा पद्भ्यामुदरेण पदं तथा । तत्सर्वं ब्रह्मार्प
णमस्तु भवतु वह्नि सुन्दरी । मां मदीयं च सकलं
हरये सम्यक् समर्पयेत् । ॐ तत्सदिति च प्रोक्तो
मंत्रः स्वात्मसमर्पणे । प्रत्यहं पूजयेद्देवं षोडशो

रुपचारकैः। तदशक्तौ तु पूजा स्याद्दशोपचारि
की तथा। तदशक्तौ पंचभिस्तु पूजा स्यादुपचा
रकैः। आसनं स्वागतं चैव पाद्यादिपंचकं तथा।
स्नानं वासोभूषणं च गन्धपुष्पं च धूपकं। प्रदी
पं चैव नैवेद्यं पुष्पांजलिरतः परं। गन्धादयो नैवे
द्यांता पूजा पंचोपचारिका। अर्घ्याद्याः पंच पंचै
व गन्धाद्या इति भेदतः। नमस्कृत्य षडंगं च पंचां
गं च विधानतः देवं विसृज्य हृदये विश्वक्सेनं
समर्चयेत्। दण्डवत् प्रणिपत्याथ गण्डाभ्यां चि
बुकेन च नासया च कपालेन मनसा वचसा त
था। साष्टांगकः प्रणामः स्यात् हरेः प्रीतिप्र
दायकः। एतत् सर्वं मयाख्यातं क्रमेण व्युत्
क्रमेण च। कथितं यत्र कथ्यितं तत्तत् सर्वं क्रमतः
शृणु। प्रातःकृत्यमनुप्रदायविनतिः स्नानं स्व
सन्ध्यात्मकं संकल्पांतकभूतशुद्धि सकलामा
लामयन्यासनं। अंतर्यागविधिर्बहिर्यजनकं
शंखादिस्थापनं। पीठस्यार्चनमंग देवयजनं
प्राणप्रतिष्ठा ततः। आह्वानं निजमुद्रिका विर
चनं ध्यानं प्रभोः स्नजनं ह्यारायनधूपदीपव
रनैवेद्यं जयो गुल्पतः। जापस्यार्पण वाद्यथार

णामतः स्वात्मार्पणं संस्तुतिर्लम्भनं च विसर्ज्ज
ने सुररिपोः पूजाक्रमः कीर्त्तितः। स्तोत्रं चैतत् प्र
कथितमनेनारायणेदच्युतं। इति नारायणेनै
व स्तोत्रं प्रकथितं पुरा। ब्रह्मणे ब्रह्मणा पूर्व्वं म
यि स्नेहात् प्रकाशितं। पुलस्त्य विधिनानेन म
याहं स उपासितः। इति सनत्कुमारीये पूजावि
धानकथनं नामाष्टमः पटलः ८॥ पुलस्त्य उ
वाच। भगवन् सर्व्वधर्म्मज्ञ कवचं यत् प्रकाशि
तं त्रैलोक्यमंगलं नाम कृपया कथय प्रभो। स
नत्कुमार उवाच। शृणु वक्ष्यामि विप्रेन्द्र कवचं
परमाद्भुतं। नारायणेन कथितं कृपया ब्रह्मणे
पुरा। ब्रह्मणा कथितं मह्यं परं स्नेहाद्वदामि ते।
अति गुह्यतरं तत्त्वं ब्रह्ममंत्रौघविग्रहं। यद्धृत्वा
पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवं। यद्धृत्वा पठ
नात् पाति महालक्ष्मीर्जगत्त्रयं। पठनाद्धारणा
त् शम्भुः संहर्त्ता सर्व्वतत्त्ववित्। त्रैलोक्यजननी
दुर्गा महिषादिमहासुरान्। वरदृप्तान् जघानै
व पठनाद्धारणाद्यतः। एवमिन्द्रादयः सर्व्वे स
र्व्वैश्वर्य्यमवाप्नुयात्। शिष्याय विष्णुभक्ताय सा
धकाय प्रकाशयेत्। शठाय परशिष्याय दत्वा

स्तमवाप्नुयात्। त्रैलोक्यमंगलस्यास्य कवचस्य
प्रजापतिः। ऋषिश्छन्दश्च गायत्री देवो नारायणः
स्वयं। धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्ति
तः। प्रणवो मे शिरः पातु नमो नारायणाय च।
भालं पायान्नेत्रयुग्ममष्टार्णो भुक्तिमुक्तिदः। क्लीं
पायाच्छ्रोत्रयुग्मं चैकाक्षरः सर्वमोहनः। क्लीं
कृष्णाय सदा घ्राणं गोविन्दायेति जिह्विकां। गो
पीजनपदं वल्लभाय स्वाहाननं मम। अष्टादशा
क्षरो मंत्रः कंठं पातु दशाक्षरः। गोपीजनपदं व
ल्लभाय स्वाहा भुजद्वयं। क्लीं ग्लौं क्लीं श्यामलां
गाय नमः स्कन्धौ दशाक्षरः। क्लीं कृष्ण क्लीं करौ
पायात् क्लीं कृष्णाय चांगजोऽवतु। हृदयं श्री भु
वनेशी क्लीं कृष्णाय क्लीं स्तनौ मम। गोपालाया
ग्निजायांते कुक्षियुग्मं सदावतु। क्लीं कृष्णाय सदा
पातु पार्श्वयुग्मं मनूत्तमः। कृष्णगोविन्दकौ पातु
स्मराद्यौ ङेयुतौ मनुः। अष्टाक्षरः पातु नाभिं कृ
ष्णेति द्व्यक्षरोऽवतु। पृष्ठं क्लीं कृष्ण कंकालं क्लीं
कृष्णाय द्विठांतकः। सक्थिनी सततं पातु श्रीं
ह्रीं क्लीं कृष्ण ठ द्वयं। ऊरू सप्ताक्षरः पातु त्रयोद
शाक्षरोऽवतु। श्रीं ह्रीं क्लीं पदतो गोपीजनवल्ल

पदं ततः। मायस्वाहेति पातु वै क्लीं ह्रीं श्रीं द
शवर्णकः। जानुनी च सदा पातु ह्रीं श्रीं क्लीं
सदशाक्षरः। त्रयोदशाक्षरः पातु जंघे चक्रायु
धःस्वयं। अष्टादशाक्षरो ह्रीं श्रीं पूर्वकोविंशव
र्णकः। सर्वांगं मे सदा पातु द्वारकानायको ब
ली। नमो भगवते पश्चाद्वासुदेवाय तत्परं।
ताराद्यो द्वादशार्णोऽयं प्राच्यां मां सर्वदाऽवतु।
श्रीं ह्रीं क्लीं दशवर्णस्तु क्लीं ह्रीं श्रीं षोडशाक्षरः ग
दाद्युदायुधो विष्णुर्मामग्नेर्दिशि रक्षतु। ह्रीं श्रीं द
शाक्षरो मंत्रो दक्षिणे मां सदा वतु। तारो नमो भ
गवते रुक्मिणीवल्लभाय च। स्वाहेति षोडशा
र्णोयं नैर्ऋत्यां दिशि रक्षतु। क्लीं हृषीकेपदं शा
य नमो मां वारुणेऽवतु। अष्टादशार्णः कामां
गो वायव्ये मां सदावतु। श्रीं मायाकामकृष्णाय
गोविन्दाय द्विठो मनुः। द्वादशाक्षरको विष्णुरु
त्तरे मां सदावतु। वाग्भवं कामकृष्णाय ह्रीं
गोविन्दाय ततः परं। श्रीं गोपीजनवल्लभाय
स्वाहेति सौस्ततः। द्वाविंशत्यक्षरो मंत्रो मामैशा
न्यां सदाऽवतु। कालीयस्य फणामध्ये दिव्यं नृ
त्यं करोति यः। नमामि देवकीपुत्रं नृत्यराजा

स॰
कु॰ मा॰
१३
13

नमच्युतं । द्वात्रिंशदक्षरो मंत्रोप्पयो मां सर्व्वतोऽ
वतु । कामदेवाय विद्महे पुष्पवाणाय धीमहि ।
तन्नोऽनंगः प्रचोदयाद्देवमां पातु चोर्द्ध्वतः । इति
ते कथितं विप्र ब्रह्ममंत्रौघविग्रहं । त्रैलोक्य मं
गलं नाम कवचं ब्रह्मरूपकं । ब्रह्मेशप्रमुखाधी
शनारायणमुखाच्छ्रुतं । तव स्नेहान्मयाख्यातं
प्रवक्तव्यं नकस्यचित् । गुरुं प्रणम्य विधिवत् क
वचं प्रपठेत्ततः । सकृत् द्विस्त्रिर्य्यथा ज्ञानं सोपि
सर्व्वतपोमयः । मंत्रेषु सकलेष्वेव देशिको नात्र
संशयः । शतमष्टोत्तरं चास्य पुरश्चर्य्या विधिः
स्मृतः । हवनादीन् दशांशेन कृत्वा तत्साधयेद्
ध्रुवं । यादि स्यात् सिद्धिकवचो विष्णुरेव भवेत् स्व
यं । मंत्रसिद्धिर्भवेत्तस्य पुरश्चर्य्याविधानतः । स्पर्द्धा
मुद्धूय सततं लक्ष्मीर्वाणी वसेत् सदा । पुष्पांज
ल्यष्टकं दत्वा मूलेनैव पठेत् सकृत् । दशवर्षस
हस्राणां पूजायाः फलमाप्नुयात् । भूर्ज्जे विलिख्य
गुलिकां स्वर्णस्थां धारयेद्यदि । कंठे वा दक्षिणे
वाहौ सोपि विष्णुर्न संशयः । अश्वमेधसहस्राणि
वाजपेयशतानि च । महादानानि यान्येव प्रादक्षि
ण्यं भुवस्तथा कलां नार्हंति तान्येव सकृदुच्चारणा

न्नतः। कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः।
त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत्। इ
दं कवच मज्ञात्वा भजेदयः पुरुषोत्तमं। शतल
क्ष प्रजप्तोऽपि न मंत्रः सिद्धिदायकः। इति सन
त्कुमारीये त्रैलोक्यमंगलं नाम नवमः पटलः ९
पुलस्त्य उवाच। करमालां नरं माला जपमाला
च कथ्यतां। सनत्कुमार उवाच। शृणु वक्ष्यामि वि
प्रेंद्र माला दृष्टा त्वया हि या। अनामामध्यमार
भ्य कनिष्ठादित एव च। तर्ज्जनीमूलपर्य्यंते द
शपर्वसु संजपेत्। तर्ज्जनीमध्यमा चेति कनि
ष्ठा चापि ताः क्रमात्। त्रिस्रोऽङ्गुल्यस्त्रिपर्वाः स्यु
र्मध्यमा चैकपर्विका। पर्वद्वयं मध्यमाया मे
रुत्वेनोपकल्पयेत्। क्रमोत्क्रमगतैर्म्माला
मातृकार्णैः सबिन्दुकैः। त्वमेरुकैः साष्टवर्गै
रंतर्यजनकर्म्मणि। आदिकचटतपयशाला
इत्येवं चाष्टवर्गाः। पद्मबीजादिभिर्म्माला बहि
र्यागे शृणुष्व ताः। रुद्राक्षशंखपद्माक्ष पुत्रजी
वक मौक्तिकैः। स्फाटिकैर्म्मणिरत्नैश्च सौवर्णै
र्विद्रुमैस्तथा। कुशापत्रैर्हीदशा सुगृहस्थस्या
क्षमालिका। अंगुलीगणनादेकं रेखयाष्टगुणं

स॰
कृ॰ मा॰
१४
14

भवेत्। पुत्रजीवैर्दशगुणं शतं शंखैः सहस्रकं। प्र
वालैर्मणिरत्नैश्च दशसाहस्रकं स्मृतं। तदेव स्फा
टिकं प्रोक्तं मौक्तिकैर्लक्षमुच्यते। कुशग्रन्थ्या कोटि
शतं रुद्राक्षं स्यादनन्तकं। तुलसीकाष्ठघटितैर्मा
लाभिर्जपमालिका। सर्वकर्माणि सर्वेषामीप्सि
तार्थफलप्रदा। अष्टोत्तरशतैर्माला पंचाशच्चत्त
राधिकैः। सप्तविंशतिभिः कार्या सर्वसाधारणे ज
पे। मोक्षार्थी पंचविंशत्या धनार्थी त्रिंशता जपेत्।
पुष्टार्थी पंचविंशत्या पंचदश्याभिचारके। माला
संग्रथने वक्ष्ये यदुक्तं ब्रह्मणा पुरा। गोपुच्छसदृ
शी माला यद्वा सर्पाकृतिर्भवेत्। मुखं मुखेन संयो
ज्य पुच्छं पुच्छेन योजयेत्। सूत्रं विप्रेन्द्रकन्याभिः
स्त्रीभिर्वापि विनिर्मितं। त्रिगुणं त्रिगुणीकृत्य तदे
व त्रिगुणं तथा। शुक्लं रक्तं तथा कृष्णं पट्टसूत्रम
थापि वा। शान्तिवश्याभिचारेषु तथैव मारणेपि च।
शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात्। सर्वे
षामेव वर्णानां रक्तं सर्वेप्सितप्रदं। आश्रमेषु तथा
प्येवं रक्तं सर्वेषु सिद्धिदं। फलोपचारतः कृष्णमि
श्रं तत्रानुसारतः। एकैकं मातृकार्णेन शतार प्र
जपेत् सुधीः। मणिमादाय सूत्रेषु ग्रथने मध्यमा

ग्रतः। मध्यग्रंथिं विधायेत्थं मेरुं च ग्रंथियंत्रितं। ग्र
थयित्वा गुरोर्मालां ततः संस्कारमारभेत्। क्षाल
येत् पंचगव्यैस्तु सद्योजातेन सज्जलैः। चंदनागु
रुगंधाद्यैर्वामदेवेन चर्चयेत्। धूपयेन्नामघोरेण
प्रीणयेत् पुरुषेण तु। मंत्रयेत् पंचमेनैव प्रत्येकं
तु सकृत् सकृत्। मेरुं सकृन्मंत्रयेच्च मनसा च
शतं शतं। येन प्रतिष्ठिता माला तमेव तु मंत्रं
जपेत्। अन्यमंत्रं जपेद्विद्वान् न कार्या कर्हिचिद् बु
धैः। सद्योजातं प्रपद्यामि सद्योजाताय वै नमः। भ
वेभवे नादिभवे भजस्व मांभवोद्भवं ङेन्तप्रणवा
द्येन नमोन्तेन क्रमाज्जपेत्। वामदेवाय नमो ज्ये
ष्ठाय रुद्राय नमः। कलाय कलविक लनाय न
मो बलप्रमथनाय सर्वभूतदमनाय मनोन्मथ
नाय नमः। अघोरेभ्योथ घोरेभ्यो घोराघोरतरेभ्य
श्च। सर्वतः सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः। तत्
पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः
प्रचोदयात्। ईशानः सर्वविद्यानामीश्वरः सर्वभू
तानां ब्रह्मा दिपतिर्ब्रह्मणोधिपतिर्ब्रह्माणि मे शि
वोऽस्तु सदाशिवोम्। प्रणवाद्या महामंत्राः सदा
शिवमिति क्रमात्। संस्कृत्यैवं ततो मालां ततस्ता

णंस्तत्र योजयेत्। मूलमंत्रेण तां मालां पूजयेद्द्विज
सत्तमः। गुरुं संपूज्य तद्धस्तात् गृह्णीयादक्षमालि
कां। न स्पृशेद्वामहस्तेन करभ्रष्टां नकारयेत्। अं
गुष्ठंमोक्षदं प्रोक्तं तर्ज्जनी शत्रुनाशिनी। मध्यमा
यतसिद्धिः स्याच्छांतिकर्मण्यनामिका। कनिष्ठा
कर्षणेज्ञेया जपकर्म्मणि सिद्धिदा। अंगुष्ठपर्व्वम
ध्यस्थं परिवर्त्तं समाचरेत्। पुरश्चर्यां ततः कुर्यात्
स्वयमेव समाहितः। गुरुणा स्वानुगेनैव तद्भ्रात
पुत्रकैस्तथा। सर्व्वास्तु दीक्षितेनैव पुरश्चर्यां स
माचरेत्। पुलस्त्य उवाच। संकल्पश्च पुरश्चर्याविधा
ने तत्र कीदृशं। तत् सर्व्वं कृपयानाथ संक्षेपेन
प्रकथ्यतां। सनत्कुमार उवाच। प्रणवं तत्सदिति
च मासपक्षतिथावपि। अमुकोऽमुकगोत्रोऽहं मू
लमूच्चार्य तत्परं। सिद्धिकामोस्य मंत्रस्य अयुत
संख्यं जपेत्ततः। दशांशं हवनं कुर्याद्दशांशं त
र्पणं ततः। दशांशं मार्ज्जनं तस्माद्दशांशं विप्रभो
जनं। पुरश्चरणमेवं हि करिष्ये पाशुदंस्त्रवः। इ
ति संकल्प्य विप्रेन्द्र जपयज्ञादिकं चरेत्। मंत्रं च
प्रातरारभ्य जपेन्मध्यन्दिनावधि। इत्यादिविधिना
लब्ध्वा पुरश्चर्यां समाचरेत्। अथवान्यप्रकारेण

पुरश्चरणमुच्यते। ग्रहणेऽर्कस्य चेन्द्रोर्वा शुचिः
पूर्व्वमुपोषितः। नद्यां समुद्रगामिन्यां नाभिमात्रो
दके स्थितः। ग्रहणाद्मोक्षपर्य्यंतं जपेन्मंत्रं समा
हितः। दृष्ट्वा स्नात्वा तु संकल्प्य विमोक्षांते जपं च
रेत्। तावज्जपादिकं कुर्य्याद्ग्रहणांते शुचिः प्रमा
न्। इति जापान्मंत्रसिद्धिर्भवत्येव न संशयः। स्ना
नादेरनुरोधेन यदि जापं त्यजेन्नरः। सप्तवेदे व
नान्द्रोही पितॄन् सप्त नयत्यधः। मासकृत्यं प्रवक्ष्या
मि सावधाना वधारय। कृष्णभक्तस्य सिद्ध्यर्थं यत्कृ
तं ब्रह्मणा पुरा। तत्तत् सर्व्वं समासेन वक्ष्येहमं
जसा शृणु। पूर्णिमा प्रतिपत्सन्धौ फल्गुनस्य फा
ल्गुने मुने। राजोपचारैः संपूज्य दोलयेद्वयोज
नार्द्दनं। अश्वमेधसहस्रस्य वाजपेयशतस्य च।
गोसहस्रप्रदानस्य फलं प्राप्नोति मानवः। दक्षि
णाभिमुखं कृष्णं दोलमानं सकृन्नरः। दृष्ट्वापरा
धनिचयैर्मुक्तः कालो नात्र संशयः। दोलारूढस्य
कृष्णस्य योऽग्रे कुर्व्वंति जागरं। सर्व्वपुण्यफलावा
प्तिं निमिषाल्लभते नरः। ततो विधिं प्रवक्ष्यामि य
त्र यत्र समाचरेत्। पौर्णमास्यां महत्पूजां संको
च दोलयेत् प्रभुं। त्रयोदशान्तरेणैव अष्टादशा

न्तरेणवा। फलयुक्तांच प्रकर्त्तव्या पूजापूर्वोक्तवा
र्त्मना। उत्थाय मंत्रं जप्तव्यमष्टाधिकसहस्रकं।
सूक्तंचैतत्तु प्रकाथितं विस्तरेण शृणुष्वमे। रेवत्यां
तु वास्तुवलिं मंडलं वचयेत्सुधीः। दिक्षुध्वजा
न् समारोप्यलोकपालसमप्रभान्। गोविन्दफ
लकायस्माद्दोलारूढं जगत्पतिं। पूजयेद्विधि
वद्भक्त्या मंडलेच समाहितः। ऋग्यजुःसामसू
क्तैश्च मंत्रैः पौराणिकैस्तथा। मंत्रैरागमिकैश्चैव
वैस्नवैः पूजयेद्धरिं। तद्गुणोत्कीर्त्तनंचैव दि
वारात्रिं नयेद्बुधः। केशवाग्रेन्टत्यगीतं यः करो
ति कलौयुगे। अपरायसहस्रैस्तैर्मुक्तः स्यान्नात्र
संशयः। कर्म्मान्तरं प्रवक्ष्यामि येनविस्नुः प्रसीद
ति। ब्रह्मणा कथितंपूर्व्वं प्रतिष्ठाविधिनिर्णयं।
रहस्यंभगवद्विष्णोः सावधानावधारय। तृणैस्त
णध्वजैश्चैव मन्दिरंनिर्म्मितं शुचिः। विधिमानेन
योदद्याद्विस्नवे मनुजोत्तमः। कोट्यब्दशतसंख्या
नि विस्नुलोके वसेदध्रुवं। मन्दिरं दारुजं चित्रं
वासुदेवाय यो ददेत्। युगानामयुतं तत्र निवसे
त् सप्तमीरितं। इष्टकैर्व्विविधैश्चित्रं वासुदेवाय
योजनः। तत्रामुसंख्यकान् कल्पान विस्नुलो

के वसेद सदा। पाषाणैर्मन्दिरं चित्रं वासुदे
वाय यो नरः। प्रदद्याद्विधिवद्भक्त्या प्रोक्तं शत
गुणं ततः। पुलस्त्य उवाच। केन वा विधिना
नाथ प्रदद्यान्मंदिरं बुधः। मोक्षप्रदाय कृष्णाय
क्रमशः कथ्यतां प्रभो। आदौ वास्तुवलिं दत्त्वा
लोकेशानध्वजेषु च। उक्तवर्णेषु गन्धाद्यैर्मूल
पारिषदान्वितान्। हेतिजात्यधिपोपेतान् पूर्व
दिक्क्रमतो यजेत्। वज्रादीन् तत्र क्रमेण ग
न्धाद्यैस्तत्क्रमाद्यजेत्। ततस्तु मण्डपतः पूर्वे
यागमन्दिरमाचरेत्। तत्त्रिभागमिते क्षेत्रेऽरत्नि
मात्रसमुन्नतां। वेदीं कृत्वा तत्रैव सर्वतोभद्र
मालिखेत्। प्रधानमन्दिरे चापि सर्वतोभद्रमंड
लं। विधाय पूजयेत्तत्र तोरणेषु समाहितः। ज
यं च विजयं चैव विघ्नेशं क्षेत्रनायकं। गंगां च
यमुनां चैव महालक्ष्मीं सरस्वतीं। पूर्वदिक्क्र
मतो युग्मं क्रमशो गन्धपूर्वकैः। संपूज्य विधि
वद्भक्त्या गंधपुष्पैश्च धूपकैः। ततो गृहं प्रवि
श्याथ वास्तोष्पतिमजमर्चयेत्। पंचगव्याक्षतो
याभ्यां प्रोक्षयेन्मण्डलं ततः। निरस्य विघ्नान्
तत्रैव बद्धपद्मासनो भवेत्। पूर्वोक्तेनैव वि

थिनामूल मुद्रादिकं चरेत्। अर्घ्यपात्रं ततः कृत्वा
मण्डले पीठमर्च्चयेत्। प्रतिमां वासुदेवाख्यां तत्र
संस्थापयेद्बुधः। हृत्पद्मे देवमाराध्य गत्वाद्यै
र्मानसैर्यजेत्। करस्थकुसुमे तेजः समानीय स्वा
समागतः। मूर्त्तौ तस्यां समारोप्य तत्तेजो मूलमंत्र
तः। हृदये करमादाय जीवन्यासं समाचरेत्। मा
यापाशांकुशाद्यंता यादीन् सप्तसविन्दुकान्। वि
पत्सत्येन्दुसंयुक्तं सप्तसोहं समुच्चरेत्। तस्य प्रा
णा इह प्राणाः पुनर्ज्जीव इह स्थितः। पुनरुच्चार्य
तस्यैव सर्वेन्द्रियाणि पुनर्वदेत्। तस्यापि वांमन
स्त्वक्श्रोत्रघ्राणपदान्यथ। प्राणा इहागत्य सुखं
चिरं तिष्ठन्तु ठ द्वयं। इति प्राणान् प्रतिष्ठाप्य देव
मावाह्य पूर्ववत्। करकच्छपिकां कृत्वा ततो ध्या
येदनन्यधीः। विस्रं शारदकोटिचन्द्रसदृशं शंखं
रथांगंगदा। दामम्भोजं दधतं सिताब्जनिलयं कांत्या
जगन्मोहनं। आबद्धांगदहारकुण्डलमहामौलि
स्फुरत् कंकणं। श्रीवत्सांकमुदारकौस्तुभधरं
वन्दे मुनीन्द्रैः स्तुतं। इति ध्यात्वा जपेन्मंत्रं राजोप
चारवत् सुधीः। तारो हृद्भगवान् ङेन्तो वासुदेवा
य ततः परं। सर्वेषु विष्णुमंत्रेषु प्रधानमनुरीरि

तः। मन्तुनानेन तत्र सर्वानासनादीन् प्रदापयेत्।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकं। मधुप
र्काचमनं स्नानं वस्त्राभरणानि च। गन्धपुष्पधू
पदीपनैवेद्याचमनं तथा। प्रदक्षिणं नमस्कारो
विसर्गश्चैव षोडश॥ छायामण्डपमागत्य मण्ड
ले पूर्ववद्धरिं। अभ्यर्च्य जुहुयाद्वह्नौ संस्कृते पू
र्ववर्त्मना। शतमष्टोत्तरं हुत्वा मन्तुनानेन वैष्णवः।
पुनर्यजेद्देवनाथे ततः पारिषदान् यजेत्। प्रथ
मा हृच्छिरोगैः स्याद्वासुदेवादिभिः परा। पूर्णान्यादिशा
क्तिसहितैः परा द्वादशमूर्त्तिभिः। चतुर्थी हरनाथा
द्यैर्वज्राद्यैः पंचमी मता। एवं संपूजितो विष्णुः प्र
सीदत्येव सत्वरं। तारेण हृदयं प्रोक्तं नमसा शिर
ईरितं। चतुर्वर्णैः शिखा प्रोक्ता पंचार्णैः कवचं म
तं। समस्तेन भवेदस्त्रमंगकल्पनमीरितम्। वा
सुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः। शंखच
क्रगदाम्भोजधरा एते चतुर्भुजाः। ततश्च मन्दिरं
दद्यान्मन्तुनानेन मानवः। पुण्यात्मा वैष्णवश्रेष्ठः
स देवो नत्र मानवः। कृत्वैवं कृतकृत्यः स्यात् सत्यं
सत्यं न संशयः। ऋग्यजुःसामसूक्तैश्च स्मार्त्तैः
पौराणिकैरपि। मंत्रैरागमिकैश्चैव वैष्णवैः की

न्नैयेद्धरिं। दर्पणं चामरं छत्रंव्यंजनंच पृथक पृथक्।
दत्त्वाचमनुनानेन प्राणायामं ततश्चरेत्। शतमष्टो
त्तरं जप्त्वा पूर्णां दद्यात्ततः परं। गायत्र्या मूलमंत्रेण
स्वाहांतेन द्विजोत्तमः। पूर्णाहुतिं ततः कृत्वा विसर्ज
नमतः परं। ऋत्विग्भ्यो दक्षिणां दत्त्वा भोजयेच्च द्विजो
त्तमान्। एवं कृत्वा तु पुण्यात्मा साक्षान्नारायणो भ
वेत्। गृहादीनां च दानेषु ब्राह्मणः क्षत्रियस्तथा। वै
श्यश्च पादजश्चैव सर्वे ह्यत्राधिकारिणः। इति सन
त्कुमारीये मालानिर्णयो नाम दशमः पटलः १०॥
ततो दीक्षाविधिं वक्ष्ये यथावदवधारय। क्रियाव
ती कलावती वर्णात्मा वेदमय्यपि। पंचायतनी
दीक्षा स्यात् सर्वदीक्षोत्तमोत्तमा। पितृमातृकृतं ना
म त्यक्त्वा पूर्वर्णवर्णिकान्। सप्तर्षिमंत्रतो विद्वानच
क्रेषु गणयेत् क्रमात्। श्रामादौ निन्दितो ज्येष्ठः पौ
षो माद्रपदस्तथा। मासेषु निन्दितेष्वेव दीक्षोक्ता ग्र
हणे शुभा। पुरुषार्थसमावाप्त्यै सशिष्यो गुरुमाश्र
येत्। मातृतः पितृतः शुद्धः शुद्धभावो जितेन्द्रियः।
सर्वागमानां सारज्ञः सर्वशास्त्रार्थतत्त्ववित्। परो
पकारनिरतः पूजाजपपरायणः। अमोघवचनः
शांतो वेदवेदांगपारगः। योगमार्गानुसन्धायी दे

वक्ता हृदयंगमः। इत्यादिगुणसम्पन्नो गुरुर्भवति
मानवः। शिष्यः कुलीनः शुद्धात्मा पुरुषार्थपराय
णः अधीतवेदः कुशलो दूरमुक्तमनोभवः। हितैषी
प्राणिनां नित्यमास्तिकस्त्यक्तनास्तिकः। स्वधर्मनिर
तो नित्यं पितृमातृहिते रतः। वाङ्मनःकायवृत्तिभि
र्गुरुशुश्रूषणोद्यतः। एभिरेव गुणैर्युक्तः शिष्यो भ
वति नापरः। द्वादशेष्वपि मासेषु यान्येव शुभदा
नि च दिनानि तानि विप्रेन्द्र सावधानावधारय। चैत्रे
त्रयोदशी शुक्ला वैशाखैकादशी सिता। ज्येष्ठे च दश
मी कृष्णा आषाढे नागपंचमी। श्रावणे द्वादशी भा
द्रे रोहिणी सहिताष्टमी। आश्विने च महापुण्या म
हाष्टम्यप्यभीष्टदा कार्त्तिके पूर्णिमा शुक्ला मार्गशी
र्षे सिता तथा। षष्ठी चतुर्दशी पौषे माघेऽप्येकाद
शी सिता। फाल्गुने च सिता षष्ठी चेति कालविनि
र्णयः। प्रशस्तास्तिथयः पुण्याः सिद्धिदाः श्रूयतां द्वि
य। पंचमी सप्तमी षष्ठी पूर्णिमा च सिता तथा। त्र
योदशी तु दशमी प्रशस्ता सर्वकार्म्मणि। एकाद
शी सिता कृष्णा प्रशस्ता कीर्त्तिता बुधैः। अश्विनी
श्रवणार्द्रा च रेवती चोत्तरात्रयं। पुष्या शतभिषा चै
व दीक्षादिषु प्रकीर्त्तिता। अथ योगं प्रवक्ष्यामि सा

पकानांहितय्यच। ऐक्य जीवात्मनो राहुर्योगं योग
विशारदाः। शिवात्मनोरभेदेन प्रतिपत्तिं परे विदुः।
कामक्रोधौ लोभमोहौ ततपरं मदमत्सरौ। वदंति
विषमानेतान् विषमं दुर्गमात्मनः। ईडयाकर्षयेद्वा
युं वाह्यं षोडशमात्रया। मथमा कुम्भयेद्वायुं विय
या मात्रया शनैः। नाड्यापिंगलया चैनं रेचयेद्योग
वित्तमः। प्राणायाममिदं प्राहुर्योगशास्त्रविशारदाः
भूयोभूयः समाक्रम्य अभ्यासेनसमाचरेत्। सनत्
कुमारतंत्रम् तत्समभूतं मुनिपुंगवात्। सनत्कु
मारात् सारंच तंत्राणां ब्रह्मभावनात्। यः पठेच्छृ
णुयाद्वापि सोऽपि पुण्यवतां वरः। पुस्तकं लिखितं
यस्य गृहे तिष्ठति नित्यशः। लक्ष्मीस्तस्य गृहं साक्षा
त् त्रिसंध्यांन विमुंचति। इति सनत्कुमारतंत्रे सन
त्कुमारपुलस्त्यसंवादे श्रीगोपालपूजाप्रयोगवि
धानंनामैकादशः पटलः ११ ॥ जम्बू मध्ये लिखितम
सं· १९४८ विक्रम =







